श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशः सर्गः ॥

## श्रीरामकर्तृकस्ताटकावधः

मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः॥ **1.26.1** ॥

पितुर्वचननिर्देशात् पितुर्वचनगौरवात्।
वचनं कौशिकस्येति कर्तव्यमविशङ्कया॥ **1.26.2** ॥

अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना।
पित्रा दशरथेनाहं नावज्ञेयं हि तद्वचः॥ **1.26.3** ॥

सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः।
करिष्यामि न सन्देहस्ताटकावधमुत्तमम्॥ **1.26.4** ॥

गोब्राह्मणहितार्थाय देशस्य च हिताय च।
तव चैवाप्रमेयस्य वचनं कर्तुमुद्यतः॥ **1.26.5** ॥

एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिन्दमः।
ज्याघोषमकरोत् तीव्रं दिशः शब्देन नादयन्॥ **1.26.6** ॥

तेन शब्देन वित्रस्तास्ताटकावनवासिनः।
ताटका च सुसङ्क्रुद्धा तेन शब्देन मोहिता॥ **1.26.7** ॥

तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्च्छिता।
श्रुत्वा चाभ्यद्रवत् क्रुद्धा यत्र शब्दो विनिःसृतः॥ **1.26.8** ॥

तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम्।
प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत॥ **1.26.9** ॥

पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः।
भिद्येरन् दर्शनादस्या भीरूणां हृदयानि च॥ **1.26.10** ॥

एतां पश्य दुराधर्षां मायाबलसमन्विताम्।
विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम्॥ **1.26.11** ॥

न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम्।
वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः॥ **1.26.12** ॥

एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्च्छिता।
उद्यम्य बाहुं गर्जन्ती राममेवाभ्यधावत॥ **1.26.13** ॥

विश्वामित्रस्तु ब्रह्मर्षिर्हुङ्कारेणाभिभर्त्स्य ताम्।
स्वस्ति राघवयोरस्तु जयं चैवाभ्यभाषत॥ **1.26.14** ॥

उद्धुन्वाना रजो घोरं ताटका राघवावुभौ।
रजोमेघेन महता मुहूर्तं सा व्यमोहयत्॥ **1.26.15** ॥

ततो मायां समास्थाय शिलावर्षेण राघवौ।
अवाकिरत् सुमहता ततश्चुक्रोध राघवः॥ **1.26.16** ॥

शिलावर्षं महत् तस्याः शरवर्षेण राघवः।
प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः॥ **1.26.17** ॥

ततश्छिन्नभुजां श्रान्तामभ्याशे परिगर्जतीम्।
सौमित्रिरकरोत् क्रोधाद्धृतकर्णाग्रनासिकाम्॥ **1.26.18** ॥

कामरूपधरा सा तु कृत्वा रूपाण्यनेकशः।
अन्तर्धानं गता यक्षी मोहयन्ती स्वमायया॥ **1.26.19** ॥

अश्मवर्षं विमुञ्चन्ती भैरवं विचचार सा।
ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः॥ **1.26.20** ॥

दृष्ट्वा गाधिसुतः श्रीमानिदं वचनमब्रवीत्।
अलं ते घृणया राम पापैषा दुष्टचारिणी॥ **1.26.21** ॥

यज्ञविघ्नकरी यक्षी पुरा वर्धेत मायया।
वध्यतां तावदेवैषा पुरा सन्ध्या प्रवर्तते॥ **1.26.22** ॥

रक्षांसि सन्ध्याकाले तु दुर्धर्षाणि भवन्ति हि।
इत्युक्तः स तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीम्॥ **1.26.23** ॥

दर्शयञ्शब्दवेधित्वं तां रुरोध स सायकैः।
सा रुद्धा बाणजालेन मायाबलसमन्विता॥ **1.26.24** ॥

अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी।
तामापतन्तीं वेगेन विक्रान्तामशनीमिव॥ **1.26.25** ॥

शरेणोरसि विव्याध सा पपात ममार च।
तां हतां भीमसङ्काशां दृष्ट्वा सुरपतिस्तदा॥ **1.26.26** ॥

साधु साध्विति काकुत्स्थं सुराश्चाप्यभिपूजयन्।
उवाच परमप्रीतः सहस्राक्षः पुरन्दरः॥ **1.26.27** ॥

सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन्।
मुने कौशिक भद्रं ते सेन्द्राः सर्वे मरुद्गणाः॥ **1.26.28** ॥

तोषिताः कर्मणानेन स्नेहं दर्शय राघवे।
प्रजापतेः कृशाश्वस्य पुत्रान् सत्यपराक्रमान्॥ **1.26.29** ॥

तपोबलभृतो ब्रह्मन् राघवाय निवेदय।
पात्रभूतश्च ते ब्रह्मंस्तवानुगमने रतः॥ **1.26.30** ॥

कर्तव्यं सुमहत् कर्म सुराणां राजसूनुना।
एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा विहायसम्॥ **1.26.31** ॥

विश्वामित्रं पूजयन्तस्ततः सन्ध्या प्रवर्तते।
ततो मुनिवरः प्रीतस्ताटकावधतोषितः॥ **1.26.32** ॥

मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत्।
इहाद्य रजनीं राम वसाम शुभदर्शन॥ **1.26.33** ॥

श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम।
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः॥ **1.26.34** ॥

उवास रजनीं तत्र ताटकाया वने सुखम्।
मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि।
रमणीयं विबभ्राज यथा चैत्ररथं वनम्॥ **1.26.35** ॥

निहत्य तां यक्षसुतां स रामः
प्रशस्यमानः सुरसिद्धसङ्घैः।
उवास तस्मिन् मुनिना सहैव
प्रभातवेलां प्रतिबोध्यमानः॥ **1.26.36** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षड्विंशः सर्गः॥